# O. P. JINDAL SCHOOL, SAVITRI NAGAR
## Half Yearly Examination (2025– 2026)

**Class X** **MM: 80**
**Subject: Sanskrit** **Time: 3. Hrs**
Name: _____________ Roll No.:___________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***
***General Instructions:* All questions are compulsory**

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड 'क' | पठित अवबोधनम् | (10 अङ्काः) |
| खण्ड 'ख' | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड 'ग' | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड 'घ' | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीयम्।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

### (खण्ड–क) पठित अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

( निम्नलिखित गद्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए )

प्रतिवर्षम् अगस्तमासस्य पंचदशतिथौ सम्पूर्णे भारतवर्षे स्वातन्त्र्यदिवसोत्सवः मान्यते। अस्मिन् दिने अस्माकं राष्ट्रं परकीयाणां बन्धनात् विमुक्तम् अभवत्। 1947 तमे वर्षे अस्मिन् दिने ब्रिटिशशासकैः सुबद्धाः भारतमाता परतन्त्रतायाः शृंखलां परित्यज्य बन्धनविहिनाः जाता। तदा दिल्लीनगरे रक्तदुर्गे (लालकिला) प्रधानमन्त्रिमहोदयैः राष्ट्रीयध्वजारोहणं संजातम्। तस्मादेव दिनात् आरभ्य महोत्सवोऽयं प्रतिनगरं प्रतिग्रामं च भारतवासिभिः महता समारोहेण मान्यते। स्वतन्त्रतादिवसे प्रातःकाले एव नगरे–नगरे ग्रामे–ग्रामे च राष्ट्रीयध्वजारोहणं क्रियते। तदनन्तरं नेतृणां भाषणानि भवन्ति।

**I एकपदेन उत्तरत –** *(केवलं प्रश्नद्वयम्)* **(1x2=2)**

**i** दिल्लीनगरे कुत्र राष्ट्रीयध्वजारोहणं संजातम ?
**ii** अस्माकं राष्ट्रं केषां बन्धनात् विमुक्तम् अभवत ?
**iii** कस्मिन् मासे सम्पूर्णे भारतवर्षे स्वतन्त्रतादिवसः मान्यते ?

**II पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(2x2=4)**

**i** कदा कुत्र च स्वतन्त्रतादिवसः मान्यते ?
**ii** स्वतन्त्रतादिवसे प्रातःकाले किं क्रियते ?
**iii** रक्तदुर्गं कुत्र वर्तते ?

**III** ***अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।*** *( उचित शीर्षक लिखिए)* **(1X1=1)**

**IV** **प्रदत्तः विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत**–*(केवलं प्रश्नत्रयम्)* **(1X3=3)**

i 'मान्यते' इत्यस्य क्रियापदस्य कर्तृपदम् किम् ?

**(अ)** भारतवर्षः **(ब)** स्वातन्त्र्यदिवसोत्सवः **(स)** राष्ट्रम् **(द)** अस्माकम्

ii 'प्रभातवेलायाम्' अस्य पदस्य कः पर्यायपदम् अत्र प्रयुक्तम् ?

**(अ)** संजातम् **(ब)** प्रातः काले **(स)** मन्यन्ते **(द)** महता

iii 'प्रतिनगरम्' इति अस्मिन् पदे कः समासः अस्ति ?

**(अ)** अव्ययीभावः **(ब)** द्वन्द्वः समासः **(स)** तत्पुरुषः **(द)** उपपद

iv 'त्यक्त्वा' इति पदस्य कृते अनुच्छेदे किं पदम् प्रयुक्तम् ?

**(अ)** परित्यज्य **(ब)** प्रतिवर्षम् **(स)** बन्धहीनः **(द)** कार्यक्रमः

## (खण्ड–ख) रचनात्मकं कार्यम्

**प्र0 2 भवान् बलरामः अस्ति रायगढनगरे च वसति। स्वनगरे वर्षायाः वर्णनं कुर्वन् स्वमित्रं कृष्णं प्रति लिखितं पत्रम् मंजूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखित(½X10=5)**

(आप बलराम रायपुर में रहते हैं। वर्षा जल का वर्णन करते हुए अपने मित्र कृष्ण को पत्र लिखिए)

शंकरनगर

(1) ———

प्रिय (2) ———

सप्रेम नमः

अत्र कुशलं (3) ———। अहम् इदानीं रायगढनगरस्य (4) ——— विषये लिखामि। अत्र अस्मिन् वर्षे अत्यधिका वर्षा अभवत्। गतसप्ताहे तु निरन्तरं वर्षा जाता। आकाशे सर्वत्र (5) ——— एव आसन्। मार्गाः अपि अवरुद्धाः आसन्। मम विद्यालये तु (6) ——— अभवत्। अत्र (7) ——— जलस्तरः वर्धितः आसीत्। वर्षा तु आनन्ददायिका भवति परम् अतिवृष्टिः (8) ——— एव उत्पादयति। तव पत्रोत्तरं प्रतीक्षिष्ये। पितृचरणयोः मम (9) ———।

तव मित्रम्

(10) ———

**मञ्जूषा –**

| |
|---|
| बलरामः, अवकाशः, रायगढतः, प्रणामाः, कृष्णः!, समस्याम्, तत्रास्तु, महानद्यायाः, मेघाः, वर्षायाः |

**प्र03मंजूषायां प्रदत्त शब्दानां सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत–(1X5=5)**

(चित्र को देखकर मंजूषा की सहायता से पाँच वाक्यों में संस्कृत में चित्रवर्णन कीजिए)

| |
|---|
| ईसामसीहः, जन्म, दिसम्बरमासस्य, केक इत्याख्यं मिष्टान्नम्, नूतनवस्त्राणि, गिरिजागृहम्, सर्वे प्रसन्नाः, उपासनसपद्धतिः, शैत्यम्, सिक्थवर्तिका, सान्ताक्लॉज इति, उपहारान् वांछति, पर्वम्, |



**प्र0 4 अधोलिखितं संवादं मंजूषायाः सहायतया उचितपदैः पुनः लिखत–      (½X10=5)**

(निम्नलिखित संवाद को मंजूषा में प्रदत्त उचित उत्तर की सहायता पुनः लिखिए)

**लता** – राधिके! प्रातःकाले एव सज्जीभूय कुत्र गन्तुं सन्नद्धा ?

**राधिका** – (1) ——————————————

**लता** – विद्यालयम्! अस्यां वेशभूषायाम् ? तव गणवेशः कुत्र अस्ति ?

**राधिका** – (2) ——————————————

**लता** – अहा! कव्यालिस्पर्धा! बहुशोभनम्। स्पर्धा तव विद्यालये एव अस्ति उत अपरस्मिन् विद्यालये ?

**राधिका** – (3) ——————————————

**लता** – त्वम् प्रतियोगितायां सम्यक् रुपेण प्रस्तुतिं कुर्याः इति मम शुभकामना।

**राधिका** – (4) ——————————————

**लता** – (5) ——————————————

*मञ्जूषा –*

| |
|---|
| (क) शुभाऽस्ते सन्तु पन्थानः।, (ख) अहं विद्यालयं गच्छामि।, (ग) धन्यवादः भगिनि। |
| (घ) विद्यालये नास्ति स्पर्धा, वयं शिक्षिकया सह अपरं विद्यालयं गमिष्यामः। |
| (ङ) अद्य काव्यालि–प्रतियोगिता अस्ति, अहं प्रतियोगितायांभागं ग्रहीतुं सज्जीभूय गच्छामि। |

## (खण्ड–ग) अनुप्रयुक्तव्याकरणम्

**प्र0 5 अधोलिखितवाक्येषु स्थूलपदानां समुचितं संधि–विच्छेदं वा लिखत**–*(केवलं प्रश्नचतुष्टयम्)*

( निम्नलिखित वाक्यों में स्थूलपदों को संधि या संधि–विच्छेद कीजिए ) **(1X4=4)**

i स्वाध्यायभ्यसनं **चैव** तपः उच्यते।

ii **प्रति + एकम्** अयनस्य अवधिः षण्मासाः।

iii मम विद्यालयस्य **भो + अनम्** दृष्ट्वा सर्वे प्रसन्नाः भवन्ति।

iv **ज्ञानादपि** धनम् उच्चतरं नास्ति।

v **ग्रामेऽस्मिन्** एका नदी वहति।

**प्र0 6 अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत।**

(निम्नलिखित वाक्यों में रेखांकित ***चार*** पदों का विकल्पों में से समास या विग्रह कीजिए) **(1x4=4)**

i <u>विद्यासमं</u> चक्षुः नास्ति।

(क) विद्येन सम (ख) विद्यायाः सम्

(ग) विद्यया समम् (घ) विद्यायै सम्

ii <u>वृक्षस्य समीपम्</u> एका नदी वहति।

(क) उपवृक्षम् (ख) उपवृक्षा

(ग) वृक्षात् दूरम् (घ) वृक्षेएव

iii क्रीडाक्षेत्रे <u>रामकृष्णौ</u> खेलतः।

(क) रामौ च कृष्णौ च (ख) रामः च कृष्णः च

(ग) रामाः च कृष्णाः च (घ) रामम् च कृष्णम् च

iv <u>अकातरः</u> परैः न परिभूयते।

(क) न अकातरः (ख) नाकातरः

(ग) न कातरः (घ) अनाकातरः

v <u>विषादेन सहितम्</u> यूथपतिः अवदत्।

(क) विषादेन सहितम् (ख) सहितविषादम्

(ग) सविषादम् (घ) सहविषादम्

**प्र0 7 प्रदत्त विकल्पेभ्यः उचितानि प्रत्ययायाः उत्तराणि चित्वा लिखत**– *(केवलं प्रश्नचतुष्टयम्)*

(निम्नलिखित वाक्यों का उचित विकल्पों में से उत्तर चुनकर लिखिए) **(1X4=4)**

i दग्धाः घोटकाः कथं **रक्ष् + अनीयर्** ?

(क) रक्षितव्याः (ख) रक्षिणीयम्

(ग) रक्षणीयाः (घ) रक्षणीयः

ii सभ्यैः उच्चैः न **हस् + तव्यत्**।

(क) हसितव्यम् (ख) हसतव्यम्

(ग) हस्तव्यम् (घ) हासितव्यम्

iii अस्माकं जीवने विद्यायाः **महत् + त्व** वर्तते।

(क) महानता (ख) महता

(ग) महत्वं (घ) महतत्वं

iv विद्वांसः एव लोकेऽस्मिन् **चक्षुष्मन्तः** प्रकीर्तिताः।

(क) चक्षुः + मन्तः (ख) चक्षुष् + मत्

(ग) चक्षुष् + मतुप् (घ) चक्षुष् + मन्त

v सदा **नीति + ठक्** आचरणं कुरु।

(क) नेतिका (ख) नैतिकः

(ग) नैतिकी (घ) नैतिके

**प्र0 8 वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा संवादं पुनः लिखत– (1X3=3)**

( वाच्य के अनुसार उचित पद चुनकर संवाद को पुनः लिखिए ) *(केवलं प्रश्नत्रयम्)*

**नयना** – सुमेश! त्वं किं करोषि ?

**सुमेशः** – अधुना तु (1) —————— पुस्तकं पठ्यते।

(क) तेन (ख) मया

(ग) अस्माभिः (घ) आवाभ्याम्

**नयना** – शोभनम्! अधुना त्वं पुस्तकं (2) ———————।

(क) पठसि (ख) पठति

(ग) पठथः (घ) पठामि

**सुमेशः** – (3) ——————— किं क्रियते ?

(क) मया (ख) तेन

(ग) तया (घ) त्वया

**नयना** – मया अपि (4) —————— पठ्यते।

(क) पुस्तके (ख) पुस्तकानि

(ग) पुस्तकम् (घ) पुस्तकान्

**प्र0 9 अधोलिखित अंकानाम् स्थाने संस्कृतपदेषु समयं लिखत–***(केवलं प्रश्नत्रयम्)* **(1X3=3)**

( कालबोधक शब्दों से निम्नलिखित दिनचर्या को पूरा कीजिए )

i गोपालः प्रातः (7:30) —————— वादने विद्यालयं गच्छति।

ii दिव्या प्रातः (8:00) ——————— वादने पूजाविधिं करोति।

iii गोपालः (2:15) ——————— वादने गृहं प्रत्यागच्छति।

iv दिव्या (3:45) ————————— वादने विश्रामं करोति।

**प्र010अधोलिखितवाक्येषु मंजूषायां प्रदत्तैः उचितअव्ययपदैः रिक्तस्थानानि पूरयत(1X4=4)**

(मंजूषा में दिए गए उचित अव्यय पदों से रिक्तस्थान को पूरा कीजिए)

| बहिः, श्वः, कुत्र, ह्यः, |
|---|

i त्वं ———— गन्तुम् इच्छति ?

ii विद्यालयात् ———— एकं सुन्दरम् उद्यानम् अस्ति।

iii ––––– सोमवासरः भविष्यति।

iv ––––– मम विद्यालये वाद–विवाद प्रतियोगिता आसीत्।

**प्र011अधोलिखित वाक्येषु रेखांकितपदं शुद्ध रूपं विकल्पेभ्यः चित्वा लिखत**–(केवलंप्रश्नत्रयम्)

(निम्नलिखित वाक्यों का उचित विकल्पों में से उत्तर चुनकर लिखिए) **(1X3=3)**

i **सा** बालकः भोजनं खादति।

(क) तम् (ख) ताम्

(ग) सः (घ) तेन

ii वृक्षे **फलाः** सन्ति।

(क) फलानि (ख) फलम्

(ग) फलेभ्यः (घ) फलानाम्

iii उद्याने **सुन्दराः** पुष्पाणि सन्ति।

(क) सुन्दरः (ख) सुन्दराणि

(ग) सुन्दरम् (घ) सुन्दरस्य

iv यूयम् कुत्र **गच्छन्ति** ?

(क) गच्छसि (ख) गच्छथः

(ग) गच्छथ (घ) गच्छ

## (खण्ड–घ) पठित अवबोधनम्

**प्र0 12 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितान् प्रश्नानाम् उत्तराणि लिखत**–

(निम्नलिखित गद्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किंचित् काष्ठं, मृण्मयम् भाजनं, कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।

I **एक पदेन उत्तरत**– (केवलं प्रश्नद्वयम्) **(½X2=1)**

i राजगृहे कीदृशं मेषयूथम् आसीत ?

ii कः जिह्वालोलुपः आसीत् ?

iii राजगृहे बालवाहनयोग्यं कम् आसीत ?

II **पूर्णवाक्येन उत्तरत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i राजपुत्राः प्रासादे कैः सह क्रीडन्ति स्म ?

ii कस्मिंश्चित् नगरे कः प्रतिवसति स्म ?

iii के प्रासादे कैः सह क्रीडन्ति स्म ?

**III** **उचितम् उत्तरम् चित्वा लिखत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i 'शीघ्रम्' इत्यस्मिन् अर्थे किं अव्ययपदम् अत्र प्रयुक्तम् ?

ii 'भूपतिः प्रतिवसति' इत्यनयोः पदयोः कर्तृपदम् किम् ?

iii 'तस्य पुत्राः'– अत्र 'तस्य' इति पदं कस्मै प्रयुक्तम् ?

**प्र0 13 अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत**–

(निम्नलिखित श्लोक को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

**असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते।।**

**I** **एकपदेन उत्तरत**–(केवलं प्रश्नद्वयम्) **(½X2=1)**

i मनः कीदृशं वर्तते ?

ii दुर्निग्रहं किम् अस्ति ?

iii श्लोके श्रीकृष्णः कं सम्बोधयति ?

**II** **पूर्णवाक्येन उत्तरत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i मनः काभ्यां गृह्यते ?

ii दुर्निग्रहं चलं च किम् अस्ति ?

iii अभ्यासेन वैराग्येण च कः गृह्यते ?

**III** **उचितम् उत्तरम् चित्वा लिखत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i अस्मिन् श्लोके 'गृह्यते' इति क्रियापदस्य कर्तृपदं किम् ?

ii 'कौन्तेय' इत्यस्य विशेष्यपदस्य विशेषणपदं श्लोके किम् ?

iii अस्मिन् श्लोके 'स्थिरम्' इतिपदस्य विलोमपदं किम् ?

**प्र0 14 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत**–

(निम्नलिखित नाट्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

**राजहंसः** – अये ! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का–का' शब्दैः वातावरणम् आकुलीक्रियते ?

**राजहंसी** – भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः..........।

**काकः** – (प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृर्ष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का–का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

**I** **एकपदेन उत्तरत**–(केवलं प्रश्नद्वयम्) **(½X2=1)**

i प्रभाते काकः कान् प्रबोधयाति ?

ii राजहंसः कुत्र विहरति स्म ?

iii प्रभाते कः सुप्तान् प्रबोधयाति ?

**II** **पूर्णवाक्येन उत्तरत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i काकः स्व–वर्णस्य तुलना केन सह करोति ?

ii वातावरणं केन आकुलीक्रियते ?

iii प्रभाते कः सुप्तान् प्रबोधयाति कर्मसु च विनियोजयति ?

**III** **उचितम् उत्तरम् चित्वा लिखत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i 'भक्षयति' इति क्रियापदस्य कर्तृपदम् किम् अस्ति ?

ii 'अस्य वर्णः अपि कृष्णः' अस्मिन् वाक्ये विशेषणपदं किम् अस्ति ?

iii'अहं तु अतीव कर्तव्यपरायण' अत्र 'अहम्' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

**प्र0 15 अधोलिखित वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**–

(निम्नलिखित वाक्यों को रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए) **(1X5=5)**

i **विषयाणाम्** उपभोगेन तेषु आसक्तिः जायते।

ii राजा **वैद्यान्** आहूय अश्वरक्षार्थम् अपृच्छत्।

iii मयूरस्य नृत्यं **प्रकृतेः** आराधना।

iv राजा **याचकेभ्यः** दानं ददाति स्म।

v पाठकस्य **षट्** गुणाः सन्ति।

**प्र0 16 निम्नलिखित श्लोकयोः अन्वयं मंजूषा सहायतया पुनः लिखत**– **(½X4=2)**

(निम्नलिखित श्लोकों को पढ़कर मंजूषा से शब्द चुनकर अन्वय को पूरा कीजिए)

**(क)** अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!

व्ययतो वृद्धिमायाति क्षयमायाति संचयात्।।

**अन्वयः**– भारति! तव अयं (1) —————— कोऽपि (2) —————— विद्यते।

(यः) व्ययतः (3) ———— आयाति (4) —————— च क्षयम् आयाति।

| |
|---|
| अपूर्वः, कोशः, संचयात्, वृद्धिम्, |

**अथवा**

**(ख)** हंसः श्वेतः बकः श्वेतः को भेदः बकहंसयोः।
नीरक्षीरविवेक तु हंसो हंसः बको बकः।।

**अन्वयः**— हंसः श्वेतः (1) ———— (अपि) श्वेतः बकहंसयोः कः (2) ———— ? नीरक्षीर (3) ———— तु हंसः हंसः (4) ———— बकः (भवति)।

| बकः, भेदः, विवकेः, बकः |
|---|

**प्र017 निम्नवाक्येषु रेखांकितानां पदानां प्रसंगानुसारं विकल्पेभ्यःशुद्धम् अर्थं चिनुत—**
(निम्नलिखित वाक्यों को विकल्पों से उचित अर्थ चुनकर लिखिए) **(1X4=4)**

**i** वानरयूथपतिः <u>**रहसि**</u> अवदत्।

(क) एकान्ते (ख) रहस्य
(ग) उच्चैः (घ) रात्रि

**ii** <u>**सूपकाराणां**</u> मेषेण सह कलहः भवति स्म।

(क) वानराणाम् (ख) पाचकानाम्
(ग) अश्वानाम् (घ) एडकानाम्

**iii** <u>**अहं**</u> तु अतीव कर्तव्यपरायणः। (वक्ता कः अस्ति ?)

(क) बकः (ख) हंसः
(ग) काकः (घ) मयूरः

**iv** <u>**शैलानां**</u> पारं द्रष्टुम् समर्थः भव इति।

(क) नदीनाम् (ख) ग्रहाणाम्
(ग) गृहाणाम् (घ) पर्वतानाम्

**प्र018** मञ्जूषायाः **सहायतयाः पाठाधारितकथायाः पूर्तिंकृत्वा रिक्तस्थानानिपूरयत (½X8=4)**
(मंजूषा की सहायता से कहानी को पूरी करके उत्तरपुस्तिका में पुनः लिखिए)

एकस्मिन् दिवसे नृपस्य (1) ———— परीक्षा कर्तुं देवराजः इन्द्रः एकस्य (2) ———— रूपं धृत्वा तस्य अग्रे आगत्य अवदत्—हे राजन्! (3) ———— दानशीलतां श्रुत्वा आशा (4) ———— भवतः समीपम् अहम् आगतवान्। देव! (5) ———— मण्डलयुक्तम् इदं जगत् (6) ———— अहं कथं पश्येयम् ? तं श्रुत्वा (7) ———— अवदत् ''भगवन्! भवतः इच्छां सम्पूर्य अहम् (8) ———— अनुगृहीतं कर्तुम् इच्छामि। आदिशतु भवान् अहम् किं करवाणि'' ? भिक्षुकः अवदत् —''यदि भवान् प्रसन्नः अस्ति तर्हि अहं भवन्तम् एकं नेत्रम् याचामि।''

मञ्जूषा—

| नेत्रहीनयाचकस्य, भवताम्, युक्तः, नेत्रहीनः नृपः, आत्मनम्, सूर्य—चन्द्र—तारागणाम्, दानशीलतायाः, |
|---|

———000———